**कर्णाकर्णि** पु॰ कर्णे कर्णे गृहीत्वा प्रवृत्तं कथनम् कर्म्मव्यतिहारे स॰ इच् समा॰ । (काणाकाणि) कर्णपरम्परया श्रवणयोग्येऽन्योन्यकथने “कर्णाकर्णि हि कपयः कथयन्ति च तत्कथाम्” रामा॰ ।

**कर्णाट** पु॰ “रामनाथं समारभ्य श्रीरङ्गान्तं किलेश्वरि ! । कर्णाटदेश इत्युक्तो राज्यसाम्राज्यदायकः” शक्तिसङ्ग॰ उक्ते देशभेदे अयञ्च देशः कूर्म्मविभागे वृ॰स॰दक्षिणस्यामुक्तः । “अथ दक्षिणेन लङ्केत्युपक्रम्य “कर्णाटमहाटविचित्रकूटेत्यादि” “कोङ्कवेङ्कटकान् दक्षिणकर्णाटान् देशान् यदृच्छयोपगतः” भाग॰५,६,८, ‘तेषां मूर्द्ध्नि ददाति वामचरणं कर्णाटराजप्रिया’ उद्भटः । कर्णाटजनपदे भवः अण् । कर्णाटभवे त्रि॰ स्त्रियां ङीप् “कार्णाटीचीनपीनस्तनवसनदशान्दोलनस्पन्दमन्दः” उद्भटः । बहुषु तस्य लुक् । कर्णाटाः तद्देशवासिषु । तस्य राजन्यपि अण् । कार्णाट तद्देशनृपे । तस्य बहुषु लुक् । एकत्वे न । “अरण्ये कार्णाट त्वदरिवनितानां विधिवशात्” उद्भटः । हलपाठे कर्णाटशब्दस्य तन्नृपे लक्षणेति भेदः । २हंसपदीलतायां स्त्री राजनि॰ । ३रागिणीभेदे संगीतदामो॰ । सा तु मालवरागस्य भार्य्या । कर्णाटे प्रसिद्धा अण् ङीप् कार्णाटी । अनुप्रासाङ्गवृत्तिभेदे ‘कार्णाटी कवर्गेणानुप्रासवतीति सरस्व॰ तद्वाक्यञ्च अलङ्कारशब्दे ३८९ पृ॰ दर्शितम् ।

**कर्णाटक** पु॰ गोत्रप्रवर्त्तके ऋषिभेदे तस्य गोत्रापत्यम् इञ् । कार्णाटकि । यस्कादि॰ तस्य स्त्रियां बहुषु लुक् । कर्णाटकास्तद्गोत्रापत्येषु । स्त्रियां तु कर्णाटक्य इत्येव

**कर्णाट्ट** न॰ कर्णः तिर्य्यग्रेखाकारवान् इवाट्टम् । गृहभेदे तन्निरुक्तिलक्षणम् “बिभिदुस्ते मणिस्तम्भान् कर्णाट्टशिखराणि च” भा॰ व॰ २६४ अ॰ ३० श्लोकव्याख्यायां नीलकण्ठेनोक्तं यथा । “कर्णस्तिर्य्यग्यानं तेन प्रकारेण यत्पाषाणादिविस्तरेण क्रियते तत्तद्गृहविशेषं कर्णाट्टमिति वदन्ति तद्धि दिक्कोणस्य चतुरस्रस्योपरि विदिक्कोण चतुरस्रं तदुपरि दिक्कोणं तदुपरि पुनर्विदिक्कोणमित्येवं क्रमेणोत्तरोत्तरमल्पप्रमाणैश्चतुरस्रैः समाप्यम् इति प्रसिद्धम्” । तत्र कर्णाटेति पाठः प्रामादिकः नीलकण्ठेन कर्णाट्टपदस्यैव व्याख्यानात् ।

**कर्णादि** त्रि॰ पाणिन्युक्ते जाहच्प्रत्ययनिमित्ते १शब्दगणे स च गणः । कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ, कर्णजाहम् अक्षिजाहमित्यादि । चतुरर्थ्यां फिञ्प्रत्ययनिमित्ते पाणिन्युक्ते २शब्दगणे च स च गणः “कर्णवसिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिज् कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवत जव जैत्र आनक” कर्णस्य सन्निकृष्टदेशादि । कार्णायनि तत्सन्निकृष्टदेशादौ त्रि॰ ।

**कर्णानुज** पु॰ ६त॰ । युधिष्ठिरे त्रिका॰ । [(काणरपाता)

**कर्णान्द** (न्दू) पुंस्त्री कर्णस्यान्दुरिव । कर्णपाली । हेम॰

**कर्णाभरणक** पु॰ कर्णाभरणमिव कायति पुष्पद्वारा कै—क । आरग्बधे वृक्षे । (सोन्दाल) राजनि॰

**कर्णारा** स्त्री हस्तिकर्णवेधन्याम् शब्दकल्पद्रुमे त्रिकाण्डशामाण्येनोक्तं तच्च मूले न दृश्यते इत्युक्तं कर्णवेधनीशब्दे ।

**कर्णारि** पु॰६त॰ । १अर्ज्जुने कर्णजिच्छब्दे तत्कथा (आजन) २नदीसर्ज्जवृक्षे राजनि॰ । [रिणां कर्णचालने त्रिका॰

**कर्णास्फाल** पु॰ आ+स्फुर—णिच्—स्फालादेशः ६त॰ । क-

**कर्णि** पु॰कर्ण-इन् । १कर्णाकारफलके शरभेदे शब्दचि॰ । भावे इन् । २भेदने च

**कर्णिका** स्त्री कर्ण—ण्वुल् कर्णे भवः अलङ्कारः इकन् अत इत्त्वम् । १कर्णाभरणभेदे (काण्) २करिशुण्डाग्रवर्त्तिन्यङ्गुल्याकारे पदार्थे ३पद्मबीजकोषे च अमरः । “यस्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः” भाग॰ ५,१६, ७, ४कक्षुकादिवृन्तपरम्परायाम् (कड़ा) ५करमध्याङ्गुलौ च मेदि॰ । ६लेखन्यां हारा॰ । ७अग्निमन्थवृक्षे ८अजशृङ्गीवृक्षे च राजनि॰ कर्णौ वृद्धोऽस्त्यस्य ठन् । ९वृद्धकर्णे त्रि॰ ।

**कर्णिकाचल** पु॰ कर्णिकायां स्थितोऽचलः । सुमेरुपर्वते हेमच॰ । यथा चास्य तथारूपेण स्थिति तथा कर्णिकाशब्दे” भाग॰५,१६,७श्लो॰उक्तं तच्च कर्णिकाशब्दे उक्तम् कर्णिकापर्वतादयोऽप्यत्र ।

**कर्णिकार** पु॰ कर्णिं भेदनं करोति कृ—अण् उप॰ स॰ । (शणियारी) १वृक्षभेदे, २आरग्बधवृक्षभेदे च (छोट सोन्दाल) शोधनरूपमलभेदकत्वात् तयोः तथात्वम् । “कर्णिकारः परिव्याधः पादपोत्पलः इत्यपि । “कर्णिकारः कटुस्तिक्तस्तुवरः शोधनो लघुः । रञ्जनः सुखदः शोथश्लेष्मास्रव्रणकुष्ठनुत्” भावप्र॰ गुणादि उक्तम् “वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः” कुमा॰ । “अनन्तरञ्च कश्चित् कर्णिकारगौरः” दशकु॰ ।

**कर्णिकिन्** पु॰ कर्णिका हस्ताग्राङ्गुलिरस्त्यस्य इनि । ह-